# શાન્તિ સૂક્તમ્

આ નો ભદ્રાઃ ક્રતવો યન્તુ વિશ્વતોઽદબ્ધાસો અપરીતાસ ઉદ્ભિદઃ ।
દેવા નો યથા સદમિદ્ વૃધે અસન્નપ્રાયુવો રક્ષિતારો દિવેદિવે ।। ૧ ।।
દેવાનાં ભદ્રા સુમતિર્ઋજૂયતાં દેવાનાં રાતિરભિ નો નિ વર્તતામ્ ।
દેવાનાં સખ્યમુપ સેદિમા વયં દેવા ન આયુઃ પ્ર તિરન્તુ જીવસે ।। ૨ ।।
તાન્પૂર્વયા નિવિદા હૂમહે વયં ભગ મિત્રમિદિતિં દક્ષમસ્ત્રિધમ્ ।
અર્યમણં વરુણં સોમમશ્વિના સરસ્વતીઃ નઃ સુભગા મયસ્કરત્ ।। ૩ ।।
તન્નો વાતો મયોભૂ વાતુ ભેષજં ન્નમાતા પૃથિવી તાત્પિતા દ્યૌઃ ।
તદ્ ગ્રાવાણઃ સોમસુતો મયોભવસ્તદશ્વિના શૃણુતં ધિષણ્યા યુવમ્ ।। ૪ ।।
તમીશાનં જગતસ્તસ્થુષસ્પતિં ધિયંજિન્વમવસે હૂમહે વયમ્ ।
પૂષા નો યથા વેદસામસદ્ વૃધે રક્ષિતા પાયુરદબ્ધઃ સ્વસ્તયે ।। ૫ ।।
સ્વસ્તિ ન ઈન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ।। ૬ ।।
પૃષદશ્વા મરુતઃ પૃશ્નિમાતરઃ શુભંયાવાનો વિદથેષૃ જરમયઃ ।
અગ્નિજિહ્વા મનવઃ સૂરચક્ષસો વિશ્વે નો દેવા અવસા ગમન્નિહ ।। ૭ ।।
ભદ્રં કર્ણેભિઃ શૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરંગૈ સ્તુષ્ટવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।। ૮ ।।
શતમિન્નુ શરદો અન્તિ દેવા યત્રા નશ્ચક્રા જરસં તનૂનામ્ ।
પુત્રાસો યત્ર પિતરો ભવન્તિ મા નો મધ્યા રીરિષતાયુર્ગન્તોઃ ।। ૯ ।।
- ઋગ્વેદ ૧.૮૯.૯

દ્યૌઃ શાન્તિરન્તરિક્ષં શાન્તિઃ પૃથિવી શાન્તિરાપઃ
શાન્તિરોષધયઃ શાન્તિઃ।
વનસ્પતયઃ શાન્તિર્વિશ્વે દેવાઃ શાન્તિર્બ્રહ્મ શાન્તિઃ
સર્વ શાન્તિઃ શાન્તિરેવશાન્તિઃ સા મા શાન્તિરેધિ ।।
- શુક્લયજુર્વેદ ૩૬.૧૭

એવા હ્યેવ એવા હ્યગ્ને એવા હીન્દ્રઃ ।
એવા હિ પૂષન્ એવા હિ દેવાઃ।।
- સામવેદ ૧૦

પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્ પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ।।